दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-292

1

14.08.2024 बुधवासरः वि.सं. २०८० श्रावणशुक्ल दशमी श्रावण 30 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## संशोधनं विना संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषद् वैश्विक समाह्वानानां निवारणं कर्तुं समर्थः नास्ति- राजदूतः आर. रवीन्द्रः



संयुक्तराष्ट्रसङ्घ भारतस्य उपस्थायि प्रतिनिधि-राजदूतः आर. रवीन्द्रः गतदिने संयुक्तराष्ट्रसङ्घस्य वादविवादे जी-4 इत्यस्य समूहस्य देशानां पक्षतः प्रदत्ते वक्तव्ये अवदत् यत् संशोधनं विना संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषद् वैश्विक समाह्वानानां निवारणं कर्तुं समर्थः नास्ति। सः उक्तवान् यत् संयुक्तराष्ट्रः सुरक्षा-परिषदि संशोधनं केवलं अस्या संरचनायां विद्यमानम् अस्थायित्वं वर्धयिष्यति अपि च वर्तमान- वैश्विक समाह्वानानि दूरीकर्तुं असमर्थो अस्ति।

## युव-क्रीडा-मन्त्री मनसुख-मण्डाविया दिल्लयां एकास्मिन् कार्यक्रमे क्रीडकानां सम्मानं कृतवान्



दिल्ल्यां विमानस्थानके पेरिस-ओलम्पिक-क्रीडायां कांस्यपदक विजेतुः भारतीय-हॉकी-दलस्य हार्दं स्वागतं जातम् तत्रैव पदक विजेतृणां दर्शनार्थं बहवः जनाः समागताः आसन्। युव-क्रीडा-मन्त्री मनसुख-मण्डाविया दिल्लयां एकास्मिन् कार्यक्रमे क्रीडकानां सम्मानं कृतवान्। भारतीय-हॉकी-दलस्य प्रथमः समूहः शनिवासरे नवदिल्ल्यां विमान स्थानकं प्राप्तवान्।

## स्वर्णपदकविजेता प्रमोदभगतः बैडमिण्टन-वर्ल्ड फेडरेशन् इत्यनेन अष्टादश्-मासानाम् अवधि-पर्यन्त निलम्बितः



टोक्यो नगरे जातायां पैरालिम्पिक शटलर-इत्यस्यां प्रतिस्पर्धायां स्वर्णपदकविजेता प्रमोदभगतः बैडमिण्टन-वर्ल्ड फेडरेशन् इत्यनेन डोपिंग-विरोधी-नियमानाम् उल्लङ्घनाय अष्टादश्-मासानामवधि-पर्यन्त निलम्बितः। एतेन कारणेन प्रमोदः पेरिस् चतुर्विंशत्यधिकं- द्विसहस्रतमवर्षस्य पैरालिम्पिकक्रीडायां भागं ग्रहीतुं न शक्नोति।

## हर घर तिरङ्गा-अभियानस्य अन्तर्गतं सम्पूर्णे देशे जनसमागमाः आयोज्यन्ते



गुरुवासरे स्वातन्त्र्यदिनस्य उत्सवस्य भागत्वेन हर घर तिरङ्गा-अभियानस्य अन्तर्गतं सम्पूर्णे देशे जनसमागमाः आयोज्यन्ते । अस्मिन् मासे पञ्चदश दिनाङ्कपर्यन्तं सम्पूर्ण देशे नागरिकेषु देशभक्ति-भावं वर्धयितुं एतत् अभियानम् आयोज्यते। एतस्य उपक्रमस्य अन्तर्गतं प्रशासनं जनान् स्वगृहेषु त्रिवर्णध्वजारोहणं कृत्वा त्रिवर्ण ध्वजया सह सेल्फी इति स्वछायाचित्रं स्वीकृत्य हर घर तिरङ्गा इति जालपुटे उपरोपणं कर्तुं प्रार्थयति। उपराष्ट्रपतिःजगदीप-धनखडः गतप्रातः नवदेहल्याः हरघरतिरङ्गा इत्यस्य द्विचक्रिकया ध्वजम् प्रदर्शितवान् । अस्मिन् अवसरे केन्द्रीयमन्त्रिणः गजेन्द्रसिंह शेखावतः राममोहननायडुः किञ्जारपुः किरेन रिजिजुः मन्सुखमाण्डविया च उपस्थिताः आसन्। मेजर- ध्यान- चन्द- राष्ट्रिय-क्रीडाङ्गणे एषः जन समागमः सम्पन्नः । अस्मिन् अवसरे एनं जनसमूहं सम्बोधयन् उपराष्ट्रपतिः धनखडः अवदत् यत्, हर घर तिरङ्गा-अभियानं राष्ट्रस्य स्वातन्त्र्यं गौरवम् विकसितभारतं प्रति प्रतिबद्धतां च प्रतिबिम्बयति।

## केन्द्रीयवित्तमन्त्रिणा भारतं विकसितराष्ट्रं निर्मातुं नवान्वेषणस्य वैज्ञानिकचिन्तायाः, त्वरित समाधानस्य च आह्वानम् कृतम्




केन्द्रीयवित्तमन्त्री निर्मलासीतारामन् इत्येषा भारतं विकसितराष्ट्र निर्मातुं नवान्वेषणस्य, वैज्ञानिकचिन्तायाः, त्वरित समाधानस्य च आह्वानम् अकरोत्। सा अद्य भोपाल-नगरस्य भारतीय-विज्ञान-शिक्षा-अनुसंधान-संस्थाने आयोजितं एकादशदीक्षान्तसमारोहं सम्बोधयन्ती आसीत्। वित्तमन्त्रिणा प्रोक्तं यत्, वैज्ञानिकशिक्षायाः शोधस्य च अधिकम् उपयोगः समाजस्य प्रगतये करणीयः इति । सीतारामन् इत्येषा भोपालनगरे भारतीय-विज्ञान-शिक्षा-अनुसंधान संस्थानस्य नूतन-शैक्षणिक-भवनस्य, व्याख्यान-भवनस्य च शिलान्यासमपि कृतवती। अनया कथि तं यत् उन्नत-रसायन-विज्ञान स्य माध्यमेन देशस्य उर्जावश्यकताः सम्पूरयितुंमपि आह्वानं कृतवती । कृत्रिममेघारित प्रौद्योगिकीयानुसन्धाने त्यादिभ्यः वर्धमानं आय व्यय आवण्टनं समेत्य प्रशासनस्य विभिन्नानां प्रयासानां उल्लेखं कुर्वती मन्त्रिणा प्रोदीरितं यत् समन्वितप्रयासैः अस्माभिः देशं विकसितराष्ट्रं विनिर्मातुं प्रयासः करणीयः। अत्रावसरे मध्यप्रदेशस्य मुख्यमन्त्री डॉ मोहनयादव अपि कार्यक्रमे भागं भजितवान्।

## पश्चिमबङ्गः-

## उच्चन्यायालयादेशेन महिला-चिकित्सिकया सह घटितं दुष्कर्मप्रकरणं केन्द्रीयान्वेषणविभागं प्रति निरीक्षणार्थं प्रेषितम्

कलकत्ता-उच्च-न्यायालयेन कोलकातानगरस्य एकस्मिन् चिकित्सकीयमहाविद्यालये चिकित्सालये च एकया महिला-चिकित्सिकया सह घटितं दुष्कर्मप्रकरणं केन्द्रीयान्वेषण विभागं प्रति निरीक्षणार्थं प्रेषितम्।



न्यायालयेन आरक्षिबलाय आदेशः प्रदत्तः यत् सर्वाणि प्रतिवेदनानि अन्वेषणविभागाय प्रदातव्यानि । पूर्वप्रधानाचार्यस्य विलम्बेन समागतोत्तरम् अभिलक्ष्य उच्चन्यायालयेन प्रश्नः पृष्टः। उक्तं च यत् राज्यप्रशासनं प्रदर्शनकारिभ्यः चिकित्सकेभ्यः किं कार्यं सम्पादयति। यतो हि प्रदर्शनरतैः चिकित्सकैः समग्रदेशे रोगिणः काठिन्यम् अनुभवन्ति।

## सुभाषितम्

अनाद्यन्ता तु सा तृष्णा
अन्तर्देहगता नृणाम्।
विनाशयति भूतानि
अयोनिज इवानलः।।
(महाभारत, वनपर्व- २/३७)

**भावार्थः-** यह तृष्णा यद्यपि मनुष्यों के शरीर के भीतर ही रहती है, फिर भी इसका कहीं आदि- अन्त नहीं है। लोहे के पिण्ड की आग के समान यह तृष्णा प्राणियों का विनाश कर देती है।

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## भारतम् आविश्वे लोकतन्त्रस्य समर्थकदेशो विद्यते-विदेशमन्त्री डॉ एस. जयशङ्करः



विदेशमन्त्री डॉ एस. जयशङ्करः न्यगादीत् यत् भारतम् आविश्वे लोकतन्त्रस्य समर्थकदेशो विद्यते। असौ विश्वासम् अभिव्यक्तवान् यत् अमरिकादेशीयेन नवनिर्वाचितेन राष्ट्रपतिना साकं भारतस्य सम्बन्धः समुचितं निर्मास्यते। डॉ. जयशङ्करः भारतामेरिकादेशयोः सम्बन्धानां विकासम् अमरिकास्थितान् भारतीय प्रवासिनः च सम्बोधयन् आसीत्। असौ पुनः अवोचत् यत् एच्. वन्. बी इति पारगमनानुमतिपत्रेण भारत- अमरिकयोः सम्बन्धान् प्रारूपं दातुं शीतयुद्धसादृशमेन योगदानं विहितम्। विश्वं प्रति विदेशमन्त्रिणः कीदृशं दृष्टिकोणं वर्तते तावत् एतादृशे प्रसङ्गे विदेशमन्त्री अब्रवीत् यत सम्पूर्णविश्वं काठिन्यं समयं दृग्गोचरीकरोति। असौ-पश्चिमैशिया-दक्षिणपूर्वैशिया-कोविड-महामारी-इत्यादीनां विषयाणां सततं प्रभावं पुनरावर्तितवान्। उक्तवान् च यत् इदमेकं समाह्वानयुतं परिदृश्यं विद्यते। काठिन्यपरिस्थितौ अपि उभयोः देशयोः मध्ये सम्बन्धः समन्वययुतो भविष्यति।


# नूरपुरे प्रस्तावितायै 737 कोटिरूप्यकाणां फिन्नासिंह-सिंचनपरियोजनायै केन्द्रस्य अनुमोदनम्



*हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः 14 अगस्त।* केन्द्रसर्वकारेण काङ्गड़ामण्डलस्य नूरपुरविधानसभाक्षेत्रे निर्माणाधीनायै फिन्नासिंहसिंचनपरियोजनायै अनुमोदनं कृतम् अस्ति। एषा परियोजना दशकं यावत् लम्बिता आसीत्। ७३७ कोटिरूप्यकाणां व्ययेन निर्माणाधीनायाम् अस्यां परियोजनायां राज्यसर्वकारेण पूर्वमेव ३०० कोटिरूप्यकाणि व्ययितानि सन्ति। अन्यं राशिं केन्द्रसर्वकारेण दास्यते। अधुनैव उपमुख्यमन्त्री मुकेश अग्निहोत्री इत्यनेन केन्द्रीयजलशक्तिमन्त्री सी. आर. पाटिलस्य समक्षं दृढतया स्वप्रकरणं प्रस्तुतम् आसीत्। अस्य कार्यं २०११ तमे वर्षे आरब्धम्। बजटस्य अभावात् एषा परियोजना स्थगिता आसीत्। ५० प्रतिशतं कार्यमेव कृतम् अस्ति। पूर्वं २०४ कोटिरूप्यकाणां राशिः अस्यां परियोजनायां व्ययः भविष्यति इति अनुमानितम् आसीत्, परन्तु विस्तारकारणात् अधुना ७३७ कोटिरूप्यकाणां व्ययः भविष्यति। अस्यां परियोजनायां भाजपा- काङ्ग्रेस-पक्षस्य नेत्रोः मध्ये बहु राजनीतिः प्रचलति। अयं विषयः विधानसभायाम् अपि बहुवारं प्रतिध्वनितः अस्ति यत् नूरपुरस्य सहस्रशः जनाः अस्याः सिञ्चनपरियोजनायाः लाभं प्राप्नुयुः। पञ्चसहस्रहेक्टेयर भूमिषु जनाः कृषिं कर्तुं शक्नुवन्ति। अधुना यावत् अस्य क्षेत्रस्य अधिकांशः कृषकाः कृषिकार्यार्थं वर्षाश्रिताः सन्ति, परन्तु अधुना सर्वकारः अत्र जलबन्धस्य निर्माणमपि योजनां कुर्वन् अस्ति। अस्य ३५ कार्याणि अपि सम्पन्नानि सन्ति। अस्मात् जलबन्धात् १.८८ मेगावाट विद्युत् उत्पादनं प्रस्तावितम् अस्ति। तस्मिन् एव काले जलबन्धे अतिरिक्तं जलं योजयितुं डायवर्सन-बाधः, लिङ्क-नहरः, सुरङ्गः, मुख्यनहरः इत्यादीनां कार्याणि प्रायः सम्पन्नानि सन्ति।

# हिमाचलप्रदेशस्य मुख्यमंत्रिणे स्वातंत्र्यदिने ध्वजोत्तोलनाय दूरभाषमाध्यमेन संतर्जना





**हिमसंस्कृतवार्ताः - कांगड़ा 14 अगस्त।** एकेन पृथक्तावादी सङ्घटनेन मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः १५ अगस्तदिनाङ्के देहरानगरस्य शहीदभुवनेशडोगराप्राङ्गणे त्रिरङ्गस्य उत्तोलनं रोधयितुं संतर्जना दत्ता। संस्थायाः प्रमुखगुर्वतवन्त पन्नू इत्यस्मात् जनानां चलदूरवाणीषु संतर्जनाकृताः वार्ताः आगच्छन्ति। उपायुक्तः काङ्गड़ा, एसडीएम च धमकीकृती आह्वानं प्राप्तवन्तौ। अवधेयं वर्तते यत् अस्मात् पूर्वमपि एषा संस्था बहुवारं पृथक्तावादीसङ्घटनेन पूर्वं धर्मशालासभाद्वारे विवादास्पदध्वजाः स्थापिताः, यस्मिन् पुलिसैः अभियुक्ताः गृहीताः आसन्। राज्यसर्वकारेण पुलिसबलं सतर्कं कृतम्। सुरक्षाव्यवस्थाः कठिनाः क्रियन्ते। प्रत्येकं कोणे कोणे च पुलिसबलानि नियोजितानि सन्ति।

# Harshwardhan Chauhan: पुलिसकर्मचारिणां बसभाटकस्य निर्णये संशोधनं भविष्यति





हिमसंस्कृतवार्ताः - शिमला 14 अगस्त।। हिमाचलपथपरिवहननिगमस्य बसयानेषु पुलिसकर्मचारिणां बसभाटकविषये गृहीतनिर्णये सर्वकारः संशोधनं करिष्यति। मंगलवासरे सचिवालये मीडियाव्यक्तिभिः सह वार्तालापं कुर्वन् उद्योगमन्त्री हर्षवर्धनचौहानः अवदत् यत् मन्त्रिमण्डलस्य समागमस्य समये सः न जानाति स्म यत् बसभाटकस्य स्थाने पुलिसकर्मचारिभिः मासिकरूपेण ११० रुप्यकाणि दीयन्ते। अस्य निर्णयस्य विषये पुलिसकर्मचारिणां संघेन मुख्यमन्त्रिणा सह वार्तालापः कृतः अस्ति। मुख्यमन्त्री आश्वासनं दत्तवान् यत् पुलिसकर्मचारिणां आग्रहानुसारं निर्णये संशोधनं भविष्यति। उद्योगमन्त्री उक्तवान् यत् राज्ये अतिवृष्ट्या औद्योगिकक्षेत्रेषु प्रायः १०० कोटिरूप्यकाणां हानिः अभवत्। ऊनायां प्रचण्डवृष्ट्या बाथुबाथड़ी औद्योगिकक्षेत्रे स्वांनद्याः समीपे नालिकायां जलप्लावनस्य कारणेन ८ तः १० कम्पनीनां हानिः अभवत्। अस्याः हानेः उत्थानाय केन्द्रं राज्यस्य साहाय्यं करिष्यति इति आशास्ति।

# रिक्तानां औद्योगिकभूखण्डानां नीलामीकरणं भविष्यति



हिमाचलप्रदेशराज्य औद्योगिकविकासनिगमस्य संचालकमण्डलस्य सभायाः अध्यक्षतां कुर्वन् उद्योगमन्त्री हर्षवर्धनचौहानः निर्देशं दत्तवान् यत् निगमस्य अन्तर्गतं औद्योगिकक्षेत्रस्य बद्दी, औद्योगिकक्षेत्रस्य दवनी इत्यादिषु स्थानेषु भूखण्डानां विक्रयणप्रक्रियायां ई-निलामपद्धतिः प्रयोक्तव्या या राज्ये सर्वत्र कार्यान्विताः। सः अवदत् यत् तस्य उद्देश्यं नीलामप्रक्रियायां पारदर्शिता, कार्यक्षमता च वर्धयितुं वर्तते। उद्योगमन्त्री २०२३-२४ वित्तीयवर्षे निगमस्य १०.२५ कोटिरूप्यकाणां शुद्धलाभस्य विषये सन्तुष्टिं प्रकटितवान्, यत् निगमस्य निरन्तरवृद्धिं वित्तीयस्थिरतां च दर्शयति। राज्य औद्योगिकविकासनिगमस्य प्रबन्धनिदेशकः राजेश्वरगोयलः बोर्डसंस्थां सूचितवान् यत् नूतनस्य हिमरासभवनस्य फेसलिफ्टकार्यं अत्याधुनिकस्य स्वरूपेण भविष्यति। औद्योगिकक्षेत्रदवनीयां भूमिस्थापनस्य सुविधायै निगमेन आवश्यकानि पदानि कृतानि इति सः सूचितवान्। सः अवदत् यत् नालागढक्षेत्रे वाणिज्यिक-आवासीय-भूखण्डयोः विकासः भविष्यति, निगमस्य सामरिकविस्तारयोजनानां भागः भविष्यति। २०२१-२२ वित्तवर्षस्य वार्षिकलेखाः सभायां बोर्डसंस्थया अनुमोदिताः। बोर्डसंस्थया २०२४-२५ वित्तवर्षस्य निगमस्य व्यावसायिकयोजनां संसाधनपूर्वसूचना च अनुमोदनं कृतम्। राज्य-औद्योगिक विकासनिगमस्य उपाध्यक्षः विशालचम्बियालः, प्रधानसचिवः उद्योग-आरडी नाजिम सहितम् अन्ये अधिकारिणः उपस्थिताः आसन्।

# हिमाचलस्य सिरमौरस्य नौराधरे सहकारीवित्तकोषे बृहत्तमः वित्तकोषभ्रष्टाचारः



हिमसंस्कृतवार्ताः,14 अगस्त। हिमाचले एकस्मिन् वित्तकोषे कोटिरूप्यकाणां भ्रष्टाचारः प्रकाशितम्। सिरमौरस्य नौराधरे सहकारीवित्तकोषे कोटिरूप्यकाणां वञ्चनं कृतम्। वित्तकोषस्य कर्मचारी एव एतत् वञ्चनं कृतवान्। आश्चर्यं यत् वित्तकोषस्य कर्मचारी ग्राहकानां लक्षरूप्यकाणां सावधि जमा (FD) अपहृतवान्, ग्राहकाश्च एतस्मिन् विषये ज्ञात्वा एव वित्तकोषस्य बहिः कोलाहलं कृतवन्तः। नौहराधरबैङ्के ग्राहकानां समूहं दृष्ट्वा सर्वे आश्चर्यचकिताः अभवन्। जिलाशाखाप्रबन्धकः मीडियां न्यवेदयत् यत् एतावता निरीक्षणे प्रायः ४ कोटिरूप्यकाणां वञ्चनं ज्ञातम्। निरीक्षणं प्रचलति, राशिः सीमाम् अतिक्रमितुं शक्नोति। परन्तु एषा राशिः बहु अधिका भवितुम् अर्हति।

हिमाचलराजकीयसंस्कृतशिक्षकपरिषद्
द्वारा १६ तः २२ अगस्त पर्यन्तं प्रचाल्यमानस्य संस्कृतसप्ताहस्य शुभारम्भे आयोज्यते
।।संस्कृतसप्ताहमहोत्सवः २०२४।।
स्थानम्- रा.व.मा.वि.धर्मशाला हि.प्र.
दिनांकः- १६ अगस्त २०२४ प्रातः ११ वादने
मुख्यातिथिः- श्रीयुत हेमराज बैरवा (भा.प्र.से.)
माननीयः उपायुक्तः जनपदः काङ्गड़ा
स्वागतमत्र भवताम्
कार्यक्रमः
- संस्कृतशोभा यात्रा - प्रातः ११ वादने
- उद्घाटनकार्यक्रमः- १२ वादने
- संस्कृतिकः कार्यक्रमाः- १२:३० वादनात्
- संस्कृतस्य महत्वविषये उद्बोधनम्- ०१:३० वादनात्
- छात्राणां शिक्षकाणाञ्च सम्मानम्- २ वादनात्
- मीडिया प्रैसवार्ता- २:३० वादनात्

# स्वतन्त्रतादिवसः, श्रावणपूर्णिमा, संस्कृतसप्ताहश्च







**हिमसंस्कृतवार्ताः, 14 अगस्त।** भारतीय स्वतन्त्रतादिवसः अगस्तमासस्य पञ्चदशे (१५ अगस्त) दिनांके राष्ट्रियोत्सवत्वेन आभारतम् आचर्यते। १९४७तमे वर्षे अगस्तमासस्य पञ्चदशे दिनांके (१५.०८.१९४७) भारतगणराज्यम् आंग्लशासनात् स्वतन्त्रमभवत्। अतः एतद्दिनं भारतस्वातन्त्र्यदिनोत्सवत्वेन आचर्यते। तत्पूर्वं ब्रिटिशजनाः भारतस्योपरि शासनं कुर्वन्ति स्म। १९४७ तमस्य वर्षस्य अगस्तमासस्य चतुर्दशे (१४/०८/१९४७) दिनांके मध्यरात्रौ द्वादशवादने आङ्गलीयाः जनाः भारतगणराज्यस्य शासनं भारतीयेभ्यः यच्छन्तः भारतदेशात् स्वदेशं प्रति गतवन्तः। अतः तद्दिनं सम्पूर्णे भारते स्वतन्त्रतायाः राष्ट्रियपर्वत्वेन आचर्यते। स्वातन्त्र्योत्सवस्य प्रमुखः कार्यक्रमः देहली-महानगरस्थे रक्तदुर्गे (लालकिला) भारतगणराज्यस्य राष्ट्रपतेः भाषणेन आरभते। ततः एव अर्थात् रक्तदुर्गादिव प्रधानमन्त्रिद्वारा ध्वजारोहणं भवति तदनन्तरं प्रधानमन्त्रिः सर्वकारस्य कार्याणां योजनां प्राकट्यन् सर्वेभ्यः शुभाशयं यच्छति। ततः सर्वेषां राज्यानां राजधानीषु मुख्यमन्त्रिणः ध्वजारोहणं कृत्वा जनेभ्यः शुभाशयं यच्छन्ति। स्वातन्त्र्यदिने प्रातः अष्टवादने राष्ट्रगानेन सह ध्वजारोहणकार्यक्रमः भवति ततः परं भारतगणराज्यस्य राष्ट्रपतिः देशं सम्बोध्य भाषणं करोति। राष्ट्रपतेः भाषणानन्तरं भारतगणराज्यस्य प्रधानमन्त्री स्वदेशं सम्बोधयति। तस्मिन् दिने भारतीयत्रिवर्णध्वजः (तिरंगा) सर्वत्र विराजते। अस्मिन् वर्षे अस्माकं समेषां भारतीयानां कृते विशिष्टोऽस्ति किमर्थमित्युक्ते १५ अगस्त स्वतन्त्रता दिवस २०२४ इत्यस्य विषयवस्तुः (थीम) विकसितं भारतम् अर्थात् भारतस्य प्राथमिकस्वरूपे (बुनियादी ढांचा), प्रौद्योगिकी, शिक्षा एवं स्वास्थ्य- सेवा सदृशेषु प्रमुखक्षेत्रेषु समग्रविकासः इत्यस्ति। यदा वयं राष्ट्रं प्रति चिन्तयामश्चेत् तर्हि तदानीमेव अस्माकं मनस्सु राष्ट्रं प्रति समर्पणभावः द्रष्टुं शक्यते। अस्मिन् क्रमे अस्माकं विश्वविद्यालयेऽपि सर्वे छात्र-छात्राश्च उत्साहिताः सन्ति तान् सर्वानपि छात्रान् अस्माकं विश्वविद्यालयस्य कुलपतिवर्याः प्रो. विजयकुमारः सी. जी महोदयाः अभिप्रेरणां प्रदत्तवन्तः यत् सर्वेऽपि छात्राः प्रधानमन्त्रिणा मन की बात अस्य कार्यक्रमस्य योजनानुगुणं "प्रत्येकस्य गृहे राष्ट्रध्वजः, गृहे-गृहे राष्ट्रध्वजः" (हर घर तिरंगा, घर-घर तिरंगा) अस्य पालनं करिष्यन्ति। अवसरेऽस्मिन् विश्वद्यालयस्य सर्वेऽपि प्राध्यापकाः छात्राणां व्यक्तित्वविकासार्थं तथा च तेषां मनस्सु राष्ट्रभावनायाः जागरणार्थञ्च समये- समये मार्गनिर्देशनं कृतवन्तः यत् अस्माकं विश्वविद्यालये अस्मिन् वर्षे संस्कृत सप्ताहस्यावसरे किमपि विशिष्टं स्यात् अतः प्राध्यापकानां निर्देशानुसारम् अस्माकं विश्वविद्यालये अस्मिन् वर्षेऽपि विगतेभ्यः वर्षेभ्यः प्रचाल्यमाणः संस्कृत सप्ताहस्याऽपि आयोजनं भविष्यति। प्रत्येकस्मिन् वर्षे श्रावण मासस्य पूर्णिमायां तिथौ "संस्कृतदिनम्" आचर्यते। अतः श्रावणपूर्णिमातः दिनत्रय पूर्वं दिनत्रय पश्चाच्च "संस्कृत सप्ताहः" इति नाम्ना प्रसिद्धोऽस्ति। अस्माकं विश्वविद्यालये महर्षिपाणिनि- संस्कृत-वैदिक- विश्वविद्यालयेऽपि महतोत्साहेन संस्कृतसप्ताहः आचरिष्यते, यस्य कार्यक्रमस्य रूपरेखा एवं प्रकारेणास्ति-

**प्रथमे दिवसे** संस्कृत सप्ताहमुपलक्ष्य शोभायात्रा, विश्वविद्यालयस्य च प्रचारसामग्रीणां वितरणं भविष्यति।

**द्वितीये दिवसे** श्लोक- अन्त्याक्षरी, सूत्र-अन्त्याक्षरीं आदाय च प्रश्नोत्तरीप्रतिस्पर्धा भविष्यति।

**तृतीये दिवसे** संस्कृत-भाषण प्रतियोगिता, निबन्धलेखनं, रंगवल्ली प्रतिस्पर्धाः च भविष्यन्ति।

**चतुर्थे दिवसे** संस्कृत-दिवसोपलक्ष्ये संस्कृतविदुषां विशिष्टव्याख्यानं भविष्यति।

पञ्चमदिवसादारभ्य **सप्तमदिवसं** यावत् जूम एप माध्यमेन ऑनलाइन व्याख्यानानि भविष्यति। अस्माकं समेषां संस्कृतानुरागिणां कृते महत् प्रमोदस्यावसरोऽस्ति यत् अस्मिन् वर्षे आभारते स्वीय अष्टसप्ततिः (७८) स्वतन्त्रता दिवसः विकसितं भारतम् इति नाम्ना आचरिष्यते। अतः अहं भगवन्तं प्रार्थये यत् अयं "गणतन्त्र महोत्सवः" समेषां भारतीयानां बुद्धिं विकासपथि नयतु।



-डॉ. सन्तोष काण्डपालः
प्राध्यापकः (शिक्षाशास्त्र-विभागः)
महर्षिपाणिनि- संस्कृत-वैदिक- विश्वविद्यालयः, उज्जयिनी

# स्वातन्त्र्यदिवसस्य पूर्वं त्रिरङ्ग्यात्रायाः आयोजनम्

## संस्कृतक्षेत्रे कार्यस्य बहुव्याप्तिः अस्ति, आगामियुगं च संस्कृतस्य भविष्यति- "रमेशगडिया"







**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला 14 अगस्त।।** ऋषिकुलविद्यापीठब्रह्मचर्याश्रमे, हरिद्वारस्य संस्कृतमहाविद्यालये च त्रिरङ्ग्यात्रायाः आयोजनं संजातम्। त्रिरङ्ग्यात्रा ऋषिकुलविद्यापीठपरिसरद्वारा रानीपुरमार्गतः मालवीयचौकतः पुनः ऋषिकुलविद्यापीठं प्राप्तवती। अस्मिन् अवसरे मुख्यातिथिः उत्तराखण्डस्य राज्यस्तरीय- जलप्रवाहपरिषदः उपाध्यक्षः (राज्यमन्त्री) रमेशगडिया उक्तवान् यत् संस्कृतं सर्वेषां भाषाणां आधारः अस्ति, संस्कृतस्य अध्ययनं कुर्वन्तः जनाः देशभक्त्या पूरिताः सन्ति, अतः संस्कृतम् अध्ययनं कुर्वन्तः छात्राः भवेयुः सर्वदा हीनतायाः उपरि, उत्तिष्ठन्तु सज्जाः भवेयुः। सः अवदत् यत् संस्कृतम् अस्य राज्यस्य द्वितीया राजभाषा अस्ति, संस्कृतक्षेत्रे कार्यस्य बहुव्याप्तिः अस्ति, आगामियुगं च संस्कृतस्य भविष्यति। राष्ट्रध्वजस्य ऐतिहासिकविकासस्य विषये प्रकाशं क्षिपन् सः अवदत् यत् स्वतन्त्रस्य देशस्य ध्वजः एव तस्य परिचयः अस्ति, प्रत्येकः भारतीयः राष्ट्रध्वजस्य आदरं कर्तुं सज्जः भवेत्। मुख्यवक्तृरूपेण उपस्थितः संस्कृतभारती-उत्तराखण्डस्य प्रान्तीयसङ्गठनमन्त्री गौरवशास्त्री अवदत् यत् स्वतन्त्रता-आन्दोलनस्य नियतलक्ष्यं प्रति नेतुम् संस्कृत-पृष्ठभूमि-छात्राणां महत्त्वपूर्णं योगदानं कृतम् अस्ति तथा च तस्य योगदानस्य अपि स्मरणस्य आवश्यकता वर्तते अद्य।। सः अवदत् यत् चन्द्रशेखरः आजाद इत्यादयः युवानः क्रान्तिकारिणः एव देशभक्तिपूर्णैः कथाभिः छात्रान् प्रेरितवन्तः। विशेषातिथिः उत्तराखण्डसंस्कृतशिक्षापरिषदः सचिवः डॉ. वाजश्रवा आर्यः अवदत् यत् संस्कृतभाषा न केवलं ईश्वरस्य भाषा अस्ति, अपि तु वैज्ञानिकभाषा इति अतिरिक्तं सङ्गणकानां कृते उपयुक्ता भाषा अपि अस्ति। यदि राष्ट्रं अस्ति तर्हि वयं तत्र स्मः अतः राष्ट्राय समर्पिताः भवितुं सर्वदा सज्जाः भवेयुः। ऋषिकुलविद्यापीठस्य प्राचार्यः डॉ. बलदेवप्रसाद चमोली आगंतुकातिथीनां स्वागतम् आभारं च प्रकटीकृत्य विद्यापीठस्य विकासस्य विवरणं प्रस्तुतवान्। मञ्चस्य संचालनं डॉ. नवीनचन्द्रपन्तः अकरोत्। अवसरेऽत्र आचार्यदेवीदत्तकाण्डपालः, चूडामणि परगांई, भास्करशर्मा, महेशबहुगुणा, रमेशजोशी, उमा जोशी, डॉ. भारती पंतः, चंपा जोशी, गीता जोशी, मनोज शर्मा, प्रकाशचंदतिवारी, गीता जोशी, कुमारी ज्योतिः, दीपकनगरः अमितशर्मा, मोहितकफल्टिया, सचिनढौढियालः, विकासः, अंकितजोशी, अभिषेकः आदयश्च उपस्थिताः आसन्।

# देवप्रतिष्ठा-पूजनमन्त्रः

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तन्नोत्वरिष्टं यज्ञ गुं समिमं दधातु। विश्वेदेवास इह मादयन्तामो ३ म्प्रतिष्ठ।

**अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।**
**अस्यै देवत्वमर्चायै मामहेति च कश्चन।**

ॐ श्रीगणपतये नमः! भोः गणपतिदेव! इहागच्छ, इह तिष्ठ, यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव, सुप्रसन्नः, सुप्रतिष्ठितो वरदो भव, अस्मत्सेवापूजनप्रार्थनादिकं गृहाण। गन्धाक्षतपुष्पादिकं यथामिलितोपचारं समर्पयामि, सप्रीति स्वीकुरु, ॐ गं गणपतये सिद्धिबुद्धिसहिताय, सर्वविघ्नविनाशकाय नमो नमः!

(एवमेव प्रत्येकं देवानां पूजाप्रतिष्ठादिकं विधेयम्)

# संस्कृतविद्यास्थानानि- १३

# यजुर्वेदस्य शाखाः

✍-श्री अभिजित् तोडकरः

पतञ्जलिमतेन यजुर्वेदस्य संहिताद्वयस्य समेत्य एकाधिकशतं शाखाः आसन्। षड्गुरुशिष्यकृते चरणव्यूहे षडशीतिः इति निर्दिष्टम्। तासु १७ शाखाः शुक्लयजुर्वेदस्य, ६९ शाखाः च कृष्णयजुर्वेदस्येति उक्तम्। तथापि अद्यत्वे शुक्लयजुर्वेदस्य माध्यन्दिनी, काण्वा च इति शाखाद्वयम् एव प्राप्यते। मध्याह्नसूर्यात् प्राप्ता अतः माध्यन्दिनसंहिता इति नाम। कण्वर्षेः शिष्यैः प्रचालिता अतः काण्वशाखा। कृष्णयजुर्वेदस्य तैत्तिरीया, मैत्रायणीया, कठी, कपिष्ठला इति शाखाचतुष्टयम् एव प्राप्यते। तैत्तिरीया इति नाम तित्तिरपक्षात् आगतमिति दृष्टम्। मित्रयुः नामकेनाचार्येण प्रणीता शाखा मैत्रायणी। कठाचार्येण प्रणीता कठशाखा, कपिष्ठलेन प्रचालिता कपिष्ठलशाखा च। शुक्लयजुर्वेदस्य माध्यन्दिनशाखायां ४० अध्यायाः तथा च १९७५ मन्त्राः सन्ति। काण्वशाखायाम् अपि अध्यायाः ४० एव तथापि मन्त्रसङ्ख्या २०८६ विद्यते। माध्यन्दिनशाखायाः १११ मन्त्राः अत्र अधिकाः। शतपथब्राह्मणानुसारं यजुर्वेदस्य अक्षरसङ्ख्या २,८८,००० अस्ति। यजुर्वेदे ६०० तः अधिकाः पद्यमन्त्राः अपि सन्ति। प्रामुख्येन ते ऋग्वेदात् स्वीकृताः। शुक्लयजुर्वेदसंहितयोः निर्दिष्टाः विषयाः एवम्- दर्शपौर्णमासयागः, अग्निहोत्रम्, चातुर्मास्ययागः,अग्निष्टोमः,अग्निचयनम्, अग्न्याधानम्, अश्वमेधयज्ञः,पुरुषमेधः, गोमेधः, सर्वमेधः,पितृमेधः इत्यादयः। माध्यन्दिनसंहितायाः षोडशे अध्याये शतरुद्रियमन्त्राः सन्ति। संहितायां प्रजापतिसूक्तम्, पुरुषसूक्तम्, शिवसङ्कल्पसूक्तम् अपि एतानि सूक्तानि अपि प्राप्यन्ते। माध्यन्दिनसंहितायाः ४० तमः अध्यायः नाम प्रसिद्धम् ईशावास्योपनिषद्। कृष्णयजुर्वेदस्य तैत्तिरीयादिषु संहितासु अपि प्रायः शुक्लयजुर्वेदविषयैः समानाः एव विषयाः प्राप्यन्ते।